| नामांक | Roll No. | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 23

# VU—53–Nim. Dar.

No. of Printed Pages — 3

## वरिष्ठ उपाध्याय परीक्षा, 2013

## निम्बार्क दर्शनम्

समय : 3 $\frac{1}{4}$ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

| | | |
|---|---|---|
| 1. | द्वेताद्वैतपदे कः समासः ? | 1 |
| 2. | एकेनैव ब्रह्मात्मकत्वलक्षणेन ज्ञातं वस्तु किमुच्यते ? | 1 |
| 3. | निम्बार्कपरम्परायां कयोः युगलयोः उपासना विद्यते ? | 1 |
| 4. | निम्बार्कमते कालतत्त्वं किम् ? संक्षेपेण लिखत । | 2 |
| 5. | निम्बार्कदर्शने वैराग्यं कतिविधम् ? तेषां नामानि लेख्यानि । | 2 |
| 6. | श्रीपरीक्षिन्महाराजः कुत्रत्यः कीदृशश्चासीत् ? | 2 |
| 7. | श्रीभगवान् सुदर्शनचक्रराजः कदा आविर्बभूव ? | 2 |
| 8. | श्रीभगवान्नियमानन्देन स्वपित्रा सह कानि तीर्थानि भ्रमितानि ? | 2 |
| 9. | उपासनीयं नितरां जनैः .............. इति श्लोकं पूरयत । | 2 |
| 10. | सुघोषमणिपुष्पकौ कयोः शंखौ आस्ताम् ? | 2 |
| 11. | के आततायिनः ? | 2 |
| 12. | स्थितप्रज्ञः कः उच्यते ? | 2 |
| 13. | श्रीमद्भगवद्गीतानुसारं मिथ्याचारः कः कथ्यते ? | 2 |
| 14. | निम्बार्कमतानुसारं प्राकृततत्त्वं किम् ? | 4 |
| 15. | ''द्वीतं तदेव द्वैतं स्यादद्वैतं तु ततोऽन्यथा'' सप्रकरणं व्याख्यात । | 4 |
| 16. | पदार्थः कति विधः ? परस्परं कीदृशः सम्बन्धः ? | 4 |
| 17. | श्रीनिम्बार्कचरितवैशिष्ट्यं लिखत । | 6 |
| | **अथवा** | |
| | व्रतादिविषये स्पर्शवेधसिद्धान्तः लेख्यः । | |
| 18. | सर्वेश्वर श्रीराधाकृष्णयोः युगलोपासना वर्णनीया । | 6 |
| | **अथवा** | |
| | श्रीनिम्बार्कचरितलेखकस्य व्यक्तित्वं कृतित्वं च वर्णयत । | |

19. निम्नांकितयोः श्लोकयोः **एकस्य** सप्रसङ्गं व्याख्या विधेया — 6

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।

पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥

**अथवा**

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्य च ।

तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥

20. निम्नांकितयोः श्लोकयोः **एकस्य** सप्रसङ्गं भावार्थः लेख्यः — 6

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।

ततो युद्धाय युज्यस्व नैवं पापमवारप्स्यसि ॥

**अथवा**

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

21. द्वैताद्वैतविवेकानुसारम् ईश्वरतत्त्वं प्रतिपादयत । 7

**अथवा**

ईश्वरजीवयोः वैधर्म्यं वर्णयत ।

22. पृथगात्मानं प्रेरितारं च मत्वा "द्वा सुपर्णा सयुजा सखाया" इत्यादि भेदवाक्यैः पदार्थस्वरूपं विधीयते तादात्म्यं वा प्रतिषिध्यत इति यथाग्रन्थं विवेचयत । 7

23. द्वैताद्वैतविवेकमाधारीकृत्य ब्रह्मणः स्वरूपं वर्णयत । 7

**अथवा**

तत्त्वत्रयस्य यथार्थता शास्त्रप्रमाणैः विलिख्यताम् ।